गात्घटवत्।तच्छब्दःपूर्वसूत्रस्थेंद्रियंपरामृशतिमनसोनिरवयवत्वमनेकेंद्रियदेहदाहयोगात्किंतुघटवन्मध्यमपरिमाणंसाव
यवमित्यर्थः।कारणवस्त्वंतःकरणमेवेतिवोध्यं।मनःकालादीनांनित्यत्वंप्रतिषेधति॥ प्रकृतिपुरुषयोरन्यत्तत्सर्वमनित्यं॥ ॥
सुगमंकारणवस्त्वंतःकरणंकाणादिकेप्रकृतिरेवोच्यतेननुबुध्यादिकंद्रव्यंसाधम्यसाधारणधर्माभावात्ननुमार्थंतुप्रकृतिं
त्रिधात्मादिनेतुमहेश्वरं।श्रस्यावयवज्ञैतैलुक्यापूर्वसृष्टिंदजगदित्यादिश्रुतिभिःपुंप्रकृत्योरविशावयवत्वादनित्यत्वमितितत्राह।
नभागलाभोभागिनोनिर्भागत्वश्रुतेः॥प्रकृतिपुरुषयोर्भागिनोभागलाभोश्रवयवावयविभावोनभज्यतेनिरवयवत्वश्रुतेर्निष्कलंनि

क्रियंशंतंनिरवद्यंनिरंजनमित्यादिनेत्यर्थः।ऽतश्रुतिप्रकाशजलयोरिवविलक्षणचेतनयोरविभागमात्रेणांशांशिभावं
वोधयतीतिदुःखस्यनिवृत्तिर्मोक्षइत्युक्तंतदवधारणायतत्रमोक्षेपरेषांमतानिनिराकरोति॥ नानंदाभिव्यक्तिर्मुक्तिर्निर्धर्मत्वा
त्॥॥आत्मनिप्रानंदरूपोभिव्यक्तिरूपश्चधर्मोनास्तिस्वरूपंचनित्यमेवेतिनसाधनसाध्यमतोनानंदाभिव्यक्तिर्मोक्षइत्यर्थः।नवि
शेषगुणोद्भितिस्तद्वत्प्रशेषविशेषप्रानंदाभिव्यक्तिश्रुवल्लोकादौलोमुक्तिरेवेतिभावः॥अन्यथाविद्यानहर्षशोकौजह
तीतिश्रुतिविरोधात्किंचाभिव्यक्तेरात्मधर्मत्वेपिसाकिंनित्याऽनित्यावाप्राद्योसिद्धत्वेनापुरुषार्थत्वंप्रत्येजन्यभावस्यविनाशित्व
मोक्षस्यनाशापत्तिःतस्मादानंदाभिव्यक्तिर्मुख्यमोक्षइतिनवीनवेदांतिनामपसिद्धांतएवातिदुः। नविशेषगुणोद्भितिस्तद्वत्॥प्र
शेषविशेषगुणोच्छेदोविनमुक्तिस्तद्वन्निर्धर्मत्वादेवेत्यर्थः।ननुतर्हिदुःखनिवृत्तिरेवकथंमोक्षउक्तःदुःखस्याविधर्मत्वाधिक्षेचेतन
प्रस्याभिर्मोक्ष्यतासंबंधेनैवदुःखाभावस्यपुरुषार्थतावक्तुमुचितेति॥ नविशेषगतिर्निष्क्रियस्य॥॥ब्रह्मलोकगतिरविनमोक्षः।आ
त्मनोनिष्क्रियत्वेनगत्यभावात्लिंगशरीरस्योपगमेचनमोक्षोघटतइत्यर्थः॥॥नाकोपरागोद्भितिःक्षणिकत्वादिदोषात्॥ क्षणि
कत्वाच्चैकात्मातस्यविषयाकारतावंधस्तद्वासनारूपोरागस्यनाशेमोक्षइतियन्नास्तिकमतंतदविनक्षणिकत्वादिदोषेणप्राकृ
तिकलयेप्राकारिलोप्युत्सेधादित्यर्थः।नास्तिकस्यैवमतांतरंदूषयति। सेवोद्भितिरपुरुषार्थत्वादिदोषात्॥ज्ञानरूपस्यात्मनःसाम
र्थ्यलोकोद्भितिरविनमोक्षः।आत्मनाशस्यलोकेपुरुषार्थत्वादर्शनादित्यर्थः।एवंसत्यप्रविज्ञानस्तेयात्मकाविलप्रपंचनाशोव्येवमात्म

नाशोनापुरुषार्थत्वान्मोक्षइत्यर्थः।संयोगश्चवियोगांतरइतिनदेशादिलाभोवि॥ ॥प्रकृत्यदेशधर्मांगनादिसाध्यमविनमोक्षोयतः॥
संयोगश्चवियोगांतमरणंतेचजीवनमितिश्रूयतइत्यर्थः तथाचविनाशित्वात्त्वाभ्यमुक्तिरिति॥ ॥नभागियोगोभागस्य॥भाग
स्यांशस्यजीवस्यभागिनंयज्ञिनिपरमात्मनिलयोनमोक्षः।संयोगाहिवियोगांतरइत्युक्तेरीश्वरेणभ्युपगमाच्चतथात्वलय
स्यापुरुषार्थत्वाच्चसुखदुःखाभावयोरेवत्वतःपुरुषार्थत्वादित्यर्थः॥ ॥नालिकादियोगोविप्रवशंभावित्वात्तदुक्तेरितर
योगवत्॥ ॥अलिकाद्यैश्वर्यसंबंधोविनमुक्तिःऐश्वर्यांतरसंबंधवदेवतत्स्याप्युक्तेदमित्यर्थः।इतरवियोगवदिति
पाठेतुविक्षावयंदृष्टांतः॥ ॥इंद्रादिपदयोगोवितद्वत्॥ इंद्रत्वेश्वर्यलाभोविनमुक्तिरितरैश्वर्यवत्क्षयिस्वात्यादित्यर्थः।इंद्रि
याण्यहंकारिकत्वेयदुक्तंतत्रपरविप्रतिपत्तिंनिराकरोति॥ ॥नभूतिप्रकृतित्वमिंद्रियाणामहंकारिकत्वश्रुतेः॥ सुगमायोज
नापरंचैतच्चात्यंतंपरंवैस्वसिद्धांतोवधतः।प्रस्मिंश्चाध्यायेपरपक्षोनिराक्रियतइत्यौनरुक्त्यंशक्यादिकमपितत्वमस्तीत्या
शयेनपरेषांपदार्थप्रतिनियमंतन्मात्रज्ञानान्मुक्तेश्चनिराकरोति॥नषट्पदार्थनियमःतद्धीन्मुक्तिश्चाद्रव्यगुणकर्मसा
मान्यविशेषसमवायाएवपदार्थइतिवैशेषिकानांनियमयश्चतज्ज्ञानान्मोक्षइत्यभ्युपगमःसोकःशक्त्याव्यतिरेका
तद्दृष्टिक्यादिनवद्रव्येभ्यःप्रकृतेरतिरेकाच्चतथाप्रकृतिविवेकादेवमोक्षस्वीकृताच्चेत्यर्थः।गंधादिमत्त्वेनैवपृथिव्यादिद्र्य
वहारेगंधादिश्चसाम्यावस्थायांनास्त्यतःपृथिवीत्वादिजातिरविघटत्वादिवत्कार्यमा ॰ ऽवृत्तिरितियदुक्तंनाहोनात्मिनोनो

नभ्रमिर्नासीत्तमोज्योतिरभूत्तदाग्यत्तशब्दादिबुध्यापुपलभ्यतेकेषांचिदेवंतु ॥ मोक्षदशायामिति॥ कोऽशादिष्वपेवं॥
न्यायपक्षमुपलभ्यमतेषुषोऽशादिष्वपिनियमोनवातन्मात्रेतरानाम्नुक्तिरूपेणपदार्थोधिक्यादित्यर्थः॥प्रस्मिन्मते
तुनित्यंपदार्थद्वयमेवनित्यानित्यसाधारणस्तुपदार्थोभिन्नएवचतुर्विंशतिद्रव्येष्ववगुणकर्मसामान्यशब्दादीनामेतन्मतावरुद्धि।
वैचभूतानांपरोक्षत्वेकार्यत्वोपपत्तेर्वैशेषिकाद्यभ्युपगतंपार्थिवाद्यणुनित्यत्वमपाकरोति॥ ॥नाणुनित्यतातत्कार्यत्वश्रुतेः।
॥पृथिव्यादयणवोनित्यतानास्तितेषामणूनामपिकार्यत्वश्रुतेरित्यर्थः।यद्यप्यस्माभिः साश्रुतिर्नदृश्यतेकालल्लुप्तत्वादिनात
स्मादिप्राचार्यवाक्यान्मनुस्मरणाच्चानुमेयायथामनुः।आद्यादिनाशिनोदशार्द्धानांचयास्मृताः।नाभिःसार्द्धमिदंसर्वंसंभवत्यनुपूर्व
शइतिदशार्द्धानांपृथिव्यादिपंचभूतानांनचत्रवाक्येणशब्देनघणुकादेवग्राह्याभितिवाच्यं।संकोचेमानाभावादिति।प्रत्यक्षेणपुशब्दोभू
तपरमाणुपरएवदैशेषिकाद्यभिमतंचतस्यनित्यत्वमनेनप्रत्यक्षेणनिराक्रियतेननुघ्राणपरिमाणद्रव्यसामान्यस्यनित्यत्वंजोगुणस्य
चौचित्यानुरोधेनाणुत्वसिद्धेःमध्यमपरिमाणत्वेनित्यत्वस्यविभुत्वेचक्रियायाघ्रनुपपत्तेरिति।ननुनिरवयवस्यपरमाणोःकर्थंकार्य
मंघटतेतत्राह॥" ननिर्भागत्वंकार्यत्वात्॥ श्रुतिसिद्धकार्यत्वान्यथानुपपत्तापृथिव्यादयणवोनामवयवारतिपार्तंजलभाष्यव्याख्यदे
वैःप्रतिपादितंपृथिवीपरमाणुर्जलपरमाणुरित्यादिव्यवहारस्तुपृथिव्यादीनामघर्षकाग्निपाचेलेवघ्रतःप्रकृतिपर्यंतम
णुत्वेविनोपपद्यतइतिपक्षपतितन्मात्रेवकिंमंधाघस्तितपातितस्यप्रसक्ततयानपृथिवीत्वादिनियामकत्वंव्यक्तशांतघोरादिविशे

षवतोव्यक्तंधादेरेवपृथिवीत्वादिसिद्धेरतोनतन्मात्राणिपृथिव्यादयःतेषुचसूक्ष्मभूतव्यवहारोभूतसाक्षात्कारणत्वादिनैवे
त्यविरोधोंतन्मात्राणिमपिपृथिवीत्वादिकमस्तुतत्पक्षेचपंचविंशतितत्वविभाजकोभाग्निस्फुलोपृथिवीत्वादिकमेव
घ्रत्यवास्फुलपृथिवीपरमाणुपरावयवैवव्यासभाष्यंमात्मोयंप्रकृतिपुरुषसाक्षात्कारोनसंभवतिरूपस्यद्रव्यसाक्षा
त्कारहेतुत्वादितिनास्तिकाक्षेपंनिराकरोति।नरूपनिर्वंधनास्तुसृष्टिनियमरूपादेवनिमित्तात्सृष्टेतिनियमोनास्तिध
र्मादिनापिसाक्षात्कारसंभवादित्यर्थः।अंजनकूनियमस्यजनकादृष्टत्वेनादोषत्वादतोवहिर्द्रव्येलोकिकप्रत्यक्षंप्रत्येवाकूत
रूपंव्यंजकमितिभावः।नन्वेवंकिमणुपरिमाणंवास्तितिनवेत्याकांक्षायांपरिमाणनिर्णयंकरोति॥ नपरिमाणचातुर्विध्यंद्व्याभां
नप्योगात्॥घ्रणुमहदीर्घहृस्वमितिपरिमाणंचातुर्विध्यंनास्तिकैर्विध्यंतुवर्ततएवद्व्याभांतप्योगात्द्व्याभ्यामेवाणुमहत्परि
माणाभ्यांचातुर्विध्यसंभवादित्यर्थः।महत्परिमाणस्यावांतरभेदावेवहृस्वदीर्घौघ्रत्यक्षावक्षादिरूपैःपरिमाणसप्रसं
गादितितत्रास्मन्नयेघ्रणुपरिमाणमकूशस्यकारणंगुणविशेषंवर्जयित्वाभूतेंद्रियाणांमूलकारणेषुसत्वादिगुणेषुमंतव्यंघ्रत्य
क्षत्वयोग्यंमध्यमादिपरिमाणंतुतत्रैवमहत्वेतारतम्यादतिपुरुषैकत्वेसामान्येनेतिकैवल्यप्राप्तेवोकूप्रकृते
रेकत्वेचसामान्येनेत्यपीष्टंतत्पर्यंसामान्येषुनास्तिकूविप्रतिपत्तिनिराकरोति॥॥घ्रनित्येत्वेपिस्थिरतायोगात्घ्रत्यभिज्ञानं
सामान्यस्यापिव्यक्तीनामनित्यत्वेपिघ्रस्थिरत्वेविसदृशेवंघ्रयंघटइतिस्थिरतायोगेनयत्सदृशमितिज्ञानंतत्सामान्यविषय

यक्तमेवतत्प्रत्यभिज्ञानमित्यर्थः।तस्मात्सामान्यापलापोयुक्तइत्याह॥नतत्प्रत्यक्षापलापः।तस्मात्।सुगमंनन्वप्रतीयमानाकृतिरूपेणा
वैशेषिकप्रत्यभिज्ञोपपादनीयासेवसामान्यशब्दार्थोस्तुत्रेत्राह॥नास्यनिवृत्तिरूपत्वंभावप्रतीतेः।सएवायमितिभावप्रत्यया
न्निवृत्तिरूपत्वेनसामान्यस्यैवप्रत्यक्षार्थत्वात्।प्रत्यक्षाहिनायमघटइत्येवप्रतीयेतकिंचप्रत्यक्षाकृतिशब्दस्याघटव्यावृत्तिरित्यर्थो
वाच्यः।तत्राघटत्वंघटसामान्यभिन्नत्वमितिसामान्याभ्युपगमएवापतितइतिननुसादृश्यनिबंधनाप्रत्यभिज्ञाभविष्यति
तत्राहनतत्वांतरंसादृश्यंप्रत्यक्षोपलब्धेः॥भूयोवयवादिसामान्यादतिरिक्तंनसादृश्यमस्तिप्रत्यक्षतएवसामान्यस्यसाद
श्यरूपतयोपलंभात्।इत्यर्थः।ननुसामान्यविकीशक्तिरेवंसादृश्यमस्तुनन्वसामान्यमस्तीत्यादिशकामपाकरोति॥निजशक्त्यभिव्य
क्तिर्वावैशिष्ट्यात्तदुपलब्धेः॥निजस्यस्वीयस्यननुएवकृतकादेर्धर्मस्यशक्तिविशेषस्योत्कर्षोविनासादृश्यशक्त्युपलब्धि
तःसादृश्योपलब्धेर्विलक्षणत्वात्तशक्तिज्ञानेहिनान्यधर्मिज्ञानसापेक्षंसादृश्यज्ञानंपुनःप्रतियोगिज्ञानमपेक्षतेऽप्र
वज्ञानवदितिज्ञानयोर्वैलक्षण्यमित्यर्थः।सादृश्यस्यकादाचित्कस्याविदर्शनात्यावत्कार्यशक्तिव्यावर्तनायाभिव्यक्ति
दमितिकिंचधर्मिणःशक्तिसामान्येनसादृश्यवाच्यावस्थाकालेपुनःसादृश्यानुपपत्तेःकिंतुपूर्वकालीनःशक्तिविशे
षोयुक्तोतएवसादृश्यमितिवक्तुंतत्पावप्रतियक्तिश्रेनंतशक्तिकल्पनापेक्षयासर्वव्यक्तिसाधारणैकसामान्यकल्पनैवयु
क्तेति।ननुतत्पाविघटादिसत्तात्मनेवघटत्वादीनामन्योन्यसादृश्यमस्तुएवंघटपटीनामवितथाचेतनेवानुगतप्रत्ययोपपत्तावु

लंसामान्येनतत्राह॥॥नसंज्ञासंज्ञिसंबंधोपि॥एकयासंज्ञयासंज्ञिनोःसंबंधोविनासादृश्यंवैशिष्ट्यान्नूतनोपलब्धेरेवंत्व
र्थः॥संज्ञासंज्ञिनावमज्ञानेतोपिसादृश्यज्ञानादितिचाप्रयोजकं॥प्रयोगश्चनसंबंधनित्यताऽभयनित्यत्वात्॥संज्ञासंज्ञिनोर्नित्यत्वात्
संबंधस्याप्यनित्यताप्रतःकर्थंतेनातीतवस्तुसादृश्यवर्त्तमानवस्तुनिस्यादित्यर्थः।ननुसंबंध्यनित्यत्वेपिसंबंधोनित्यस्या
त्किमत्रबाधकंतत्राह॥बाजःसंबंधोधर्मिग्राहकंमानबाधात्॥कादाचित्कविभागेसत्येवसंबंधःसिध्यतिप्रत्यक्षावस्थमाणसा
स्वरूपेलेवोपपत्तोसंबंधतत्स्वभावत्वेनानवस्थाशतसहस्रकादाचित्कोविभागोननसंबंधनित्यत्वेसंभवति।प्रतःसंबंधग्राहकप्रमाणेनैवबा
धाच्चनित्यःसंबंधइत्यर्थः।नन्वेवंनित्यकेगुणगुणिनोर्नित्यःसमवायोनोपपद्येतत्राह॥नसमवायोस्तिप्रमाणाभावात्।सुगमान्नन्
वैशिष्ट्यप्रसक्तंविशिष्टबुध्यन्यथानुपपत्तिश्चप्रमाणंतत्राह॥उभयत्राप्यन्यथासिद्धेर्नप्रत्यक्षमनुमानंवा॥उभयत्राविवैशिष्ट्यौ
प्रत्यक्षेतदनुमानेवसस्वरूपेलेवान्यथासिद्धेर्नतदुभयंसमवायेप्रमाणमित्यर्थः।प्रयोगःयथासमवायेवैशिष्ट्यबुद्धिःसमवाय
स्वरूपवेलेवेश्यतेऽनवस्थाभयादितितत्रप्रत्यक्षानुमानेन्यथासिद्धेरवंगुणगुणप्रभृतौविशिष्टबुद्धिरविगुणादिस्वरूपवेलेवे
त्यतोऽप्रतस्तत्रापिप्रत्यक्षानुमानेन्यथासिद्धेरतिनैवंसयोगोविनसिध्यतिभूतलादौघटादिप्रत्ययस्यापिस्वरूपवेलेवान्य
थासिद्धेनविशिष्टबुद्धिप्रसंगात्तसमवायस्यतेचसमवेतस्यकदाचिदप्राप्तवियोगानातीतिनार्थपेक्षः कश्चिन्नतापात्म्य
संबंधेनात्रसमवायस्यान्यथासिद्धिमाहातत्रशब्दःप्रक्रमेपतातापात्म्यंप्रत्रनास्तेतवतत्स्यगुणविशेषोविगुणत्वेसत्यात्तनचवै

शिष्यबुद्धिनियामकसंबंधएवागत्यावश्यकः तथा च तत्समवायइतिवाग्व्यवहारोपपत्तेः संबंधस्तुसिद्ध
एवेतियदि च तत्पात्त्यमपिवस्तुरूपमेवोच्यतेतदास्मानिरवयवदेवोऽस्मीतिशब्दमात्रभेदइतिकिंचलक्षणा
नियामकत्वेदृष्टघटोद्रव्यमित्यादौनत्वाधाराधेयभावबुद्धिनियामकत्वमपिघटस्यद्रव्यमित्यत्रनतुभवात्प्रतीयत्वादि
कमेवद्रव्यादितादात्म्यंतत्रत्रकथमाधाराधेयभावबुद्धिनियामकतयापरैरिष्टःसमवायसंबंधस्तादात्म्येनचरितार्थः
स्यात्तत्तत्पदोपदत्वाद्यथावादितिप्रकृतेः क्षोभात्पुरुषसंयोगः तस्मात्तत्सृष्टिरितिसिद्धांतः तत्रायंनास्तिकोनास्ति
नास्तिक्षोभस्यैककस्यापिक्रियासंबंधेवस्तुक्षणिकंयत्सत्यंतत्तत्रैवविनश्यतीत्यतोनदेशांतरसंयोगात्तेषांक्रियासिध्यतीतितत्राह॥
॥नानुमेयत्वमेवक्रियायानेदिष्टस्यतत्तदेशेरवापरेष्वप्रकृतिः॥ नकेवलंदेशांतरसंयोगादिनाक्रियाया अनुमेयत्वमेवयतोने
दिष्टस्यनिकटस्थस्यद्रष्टुःक्रियाक्रियावतोःप्रत्यक्षेएवविप्रतीतिरस्तिवृक्षप्रत्यक्षतीत्यादिरित्यर्थः।द्वितीयाध्याये शरीरस्य
पंचभौतिकत्वादिरूपेभूतभेदएवोक्तोनतुविशेषोबंधनंतेषुत्रपरपक्षंनिषेधति ॥॥नपंचत्वेकिंकंशरीरंबहूनामुपा
दानयोगात्॥ बहूनांभिन्नजातीयानांशेषंसुगमंभिन्नजातीयानांसंयोगादनवयवत्वेनदृष्टमितिसजातीयभेदो
पादानेदृष्टत्वेनतुल्यवस्तुत्वमुपेत्यभूतभौतिकत्वेनपंचभौतिकत्वव्यवहारःएतेनहिवस्तुभौतिकत्वपक्षाश्रितिरस्ता एकोपा
नत्वेपिपृथिव्येवोपादानेसर्वशरीरेस्थितेवस्थितस्थूलभेदशरीरमितिकेचिन्तत्राह॥नस्थूलमितिनियमश्रुतिबाधितत्वा

विविधमनुभूतात्भोगायतनत्वेनेंद्रियाश्रयत्वेनाविशेषत्वंयस्मात्सर्वदयदाःसूक्ष्मास्तस्मिन्नाश्रयंतिषट्तस्माद्धारमित्या
हुस्तस्यमूर्तिमत्त्वेविष्णुरितिमनुवत्स्थूलदेहादृशंचशरीरंस्थूलंपुरुषस्यभवेदितिनियमः कुतश्चातिवाहिकस्यापुरुष
कर्मजस्यभौतिकस्यशरीरांतरस्यापिसत्वादित्यर्थः।लोकांतरेकोकांतरलिंगदेहप्राप्तिर्वाभ्युपेत्यतीत्यातिवाहिकंभूताश्रयंविनाधि
त्रादिवर्त्तिलिंगदेहस्यगमनानुपपत्तेः प्रागेवोक्तत्वात्तदंशस्यैवतस्यैवस्थूलशरीरप्राप्त्यर्थंलिंगस्यवशरीरत्वंभोगश्रयतयापु
रुषप्रतिबिंबश्रयतयावेतिवोध्यं श्रुतिर्वाहिकशरीरंचप्रमाणंअंगुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टः
।अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमबलात्पमसुक्तिस्मृतीनांहिलिंगशरीरस्यसकलशरीरव्यापिनस्तोंगुष्ठमात्रंनसंभवतिश्रुत
आधारंस्यादंगुष्ठमात्रंतमर्थोतसिध्यतिमध्यादीपस्यसर्वगृहव्यापित्वेपिकालिकाकारंतैलवर्त्तादिसूक्ष्मांशस्यदशोपरि
सर्वंडितस्यपार्थिवभागस्यकलिकाकारनशात्वैवलिंगदेहस्यदेहव्यापित्वेपंचांगुष्ठपरिमाणत्वंवाश्रयसूक्ष्मभूत
संख्यांगुष्ठपरिमाणत्वेनानुमेयमितिगोलकेभ्योतिरिक्तानींद्रियाणिप्रागुक्तानितदुपादानेनेंद्रियाणांमहाभूतप्रकाश
कत्वनियमकरोतिनाप्राप्तप्रकाशकत्वमिंद्रियाणांमहाभूतैःसर्वत्रोपपत्तेः॥ स्वांसंबद्धानींद्रियाणिनप्रकाशयंतिस्वप्रा
प्तेःप्रदीपादीनामप्राप्तप्रकाशकत्वादर्शनात्प्राप्तप्रकाशकत्वेत्याचक्षतेतत्रहिताद्दिसर्ववस्तुप्रकाशकत्वादर्शनात्स्वप्राप्तप्रकाशक
त्वेत्रवहिताद्दिसर्ववस्तुप्रकाशकत्वप्रसंगाच्चेत्यर्थः।प्रतीतेरित्यारभ्यादिसंबंधांपंचांगलक्षणातिरिक्तेंद्रियमितिभारः क

तिकत्वमपदेशस्तुपूर्ववत इंद्रियाणां प्रौतिकत्वं बहुप्रदेशकत्वमात्रेणेत्यर्थः ननुप्राणस्य शरीरे प्राधान्यात्प्राणएवदेहारं
भकोस्तुतत्राह। नदेहारंभकस्यप्राणस्तर्हींद्रियशक्तिरेवंतः करणंविनाप्रा
णव्यापारान्वयव्यतिरेकाभ्यामिंद्रियशक्तेर्बुद्धितत्वदेवप्राणनादिव्यापारसिद्धेर्नतद्व्यत्यः प्राणस्यतीतिचेच्चुष्म
तीवेंद्रियेमृतेदेहसत्वानुसरणेबलः प्राणएवदेहकारणत्वेप्राणंविनापिदेहानुसरणेतत्रा
हभोक्तुरधिष्ठानाद्भोगायतनानिर्माणंप्रत्यप्यपेक्षितेप्राणएवप्रसंगात्।भोक्तुःप्राणेनाधिष्ठानात्व्यापारोदेवभोगायतनस्यश
रीरस्यनिर्माणंभवतिप्रत्यक्षप्राणव्यापाराभावेशुक्रशोणितयोःपतितभावप्रसंगान्मृतदेहवदित्यर्थः तस्माच्चसंसरणादि
व्यापारविशेषैःप्राणोदेहस्यनिमित्तकारणंपारंपर्यादितिभावः ननुप्राणस्येवाधिष्ठानंसंभवतिव्यापारवत्वात्तत्राह।नित्यः
कूटस्थत्वात्तन्नेत्यर्थः अधिष्ठानेप्रयोजनाभावात्तंप्रतिव्यापारवत्वेनाधिष्ठानस्यावश्यंभावाच्चेतितत्राह।।मृतस्य का
रस्याप्यधिष्ठातृत्वेनकांतात्देहनिर्माणेव्यापारूपमधिष्ठानंतावन्नित्यंचेतनत्वेकांतात्तस्यापिनाप्राणरूपभ
त्वंतावत्यापारात्तःपुरनिर्माणेत्यर्थः तथाचप्राणस्याधिष्ठातृत्वंतावदनुरूपस्याधिष्ठातृत्वंतुप्राणसंयोगमात्रेणेति
सिद्धंकुलालादीनांघटादिनिर्माणेतत्रापिविशेषमात्रंतत्रचेतन्यस्यबुद्धेःप्राप्तुपयोजकत्वंबुद्धिपूर्वकसृष्टित्वादितियद्यपि
प्राणंविष्ठानादेवदेहनिर्माणंतथापिप्राणसंयोगाप्रेक्षोपुरुषार्थमेवप्राणोनदेहनिर्माणादित्याशयेनभोक्तुरि ति

८८

अधिष्ठानाविलक्षणेप्राणप्रवेशकालेचसमग्रस्यैवलिंगशरीरस्यप्रवेशोभवतिप्राणसाहित्येनैवतत्व्यापारात्तवि
शेषेपार्थक्यप्रधानस्येत्युक्तंतत्रकथमात्मानित्यमुक्तोबंधदशानादितिपरेणसंबंधेनित्यमुक्तिमुपपा
दयितुमाह।।समाधिसुषुप्तिमोक्षेषुब्रह्मरूपतासमाधिरसंप्रज्ञातावस्थासुषुप्तिश्चात्रसमग्रसुषुप्तिः मो
क्षश्चविदेहकैवल्यंप्रास्तावस्थासुपुरुषाणांब्रह्मरूपतावुद्धिवृद्धिविलयतस्तदोषाधिकपरिच्छेदादिविग
मेनस्वस्वरूपपरिणत्यावस्थानंयथाघटध्वंसेघटाकाशस्यपरिणेत्यर्थः तदेतदुक्तंतन्निवृत्तावुपरागोपरागः स्वस्य
इतितथाचब्रह्मत्वमेवपुरुषाणांस्वभावोनैमित्तिकत्वाभावात्तत्कृतिकस्यशैत्यादिवबुद्धिवृत्तिसंबंधकालेनुपरि
क्तेचिद्रूपतेत्यभिव्यक्तापरिच्छेदाभिमानःतथावृत्तिप्रतिबिंबवशादुःखादिमालिन्याभिरक्तभवतीतितत्सर्वमौपा
धिकमेवउक्ताध्यारोपनिमित्तत्वव्यतिरेकानुविधानात्स्फटिकलौहित्यवादितिभावः।।तथाचयोगसूत्रवृत्ति
सारूप्यमितरत्रेतिअस्मच्छब्देचब्रह्मशब्दश्चौपाधिकपरिच्छदमालिन्यादिरहितपूर्णचेतनसामान्यवाचीनतु
ब्रह्मप्रीमांसायामिवप्रयोजनलक्षितपुरुषविशेषमात्रवाचीतिविवेक्तव्यं।।अत्रेतेश्लोकाःशिष्यस्यशुश्रूषुम
व्यतेचित्तकाशेनाभिव्यक्तेनानाकारेतिततस्ततः।धारणीसहजेकेतुमारंभपरीक्षेवेतिति।वस्तुतस्तुसदाकारणमेवब्रू
मंचचित्रभोगादिसृष्टिप्रदेशेदृश्यमानंनूपपद्यतिचस्फटिकरूपवस्तुसंदृश्यावृत्तिहिनेतात्समाध्यादौचसानास्ति

ततः परमः पुमांस्तथैव मोक्षादिकालेनैव पुरुषस्य स्वरूपं वाशिष्ठेप्रदर्शितं। प्रसंभवति सर्वत्रदिग्भस्माकाश
रूपिणि। प्रकाशेयादृशं रूपंप्रकाशस्यामलंभवेत्॥ त्रिजगत्यमलंचेतिदृश्येसत्तामुपागतेऽदृश्यः स्यात्केवलीलोभ
वस्तादृशोविमलात्मनरति। तर्हिकः समाधिसुषुप्तिसंज्ञोक्तस्यविशेषस्तत्राह द्वयोः सबीजमन्यत्रतत्रुतिः॥ द्वयोःस
माधिसुषुप्त्योः सबीजत्वंधर्मिबीजवासनादिसहितंवृत्तत्वं प्रत्यत्रभोग्यबीजस्याभावइतिविशेषइत्यर्थः। ननुचेत्समाधा
वेवंभबीजमस्तितर्हितेनैवपरिछेदात्स्वंवृत्तत्वमितिचेन्नबंधबीजस्यवासनाकर्मादेस्तदानीमुपाधावेवावस्थानात्तनच
चेतनेषुपुरुषेषुतेजासमप्रतिबिंबनादितिजाग्रदाद्यवस्थांतुबुद्धिवृत्तिप्रतिबिंबवशादौपाधिकोबंधस्यसत्वादेवदितिननुप
तंजलेतद्ब्रह्मसंप्रज्ञातमितिनिर्बीजउक्तः प्रत्यक्षंसबीजउच्यतइतिचेन्नापूर्वापूर्वासंप्रज्ञातेऽमेणबीजक्षयोभवतीत्या
शयेनैवतत्रनिर्बीजत्ववचनात्तत्रचरमासंप्रज्ञातस्यैवनुमत्यानिर्बीजत्वात्प्रत्यक्षासबीजासमेवासंप्रज्ञातव्यक्तीनांनिर्बीज
त्वेव्युत्पानानुपपत्तेरितिननुसमाधिसुषुप्तीदृष्टेस्तःप्रत्यक्षेतुकिंप्रमाणमितिनास्तिकाक्षेपंपरिहरति॥ द्वयोरित्यत्रयस्या
पिदृष्टत्वान्नदुष्टौ॥ समाधिसुषुप्तिदृष्टांतेनमोक्षस्यापिदृष्टत्वादनुमितत्वान्नतुल्यौसुषुप्तिसमाधीएवकिंतुमोक्षोप्यस्ती
त्यर्थः। ननुमानंवेत्यंसुषुप्तादौमोक्षत्वाभावस्तत्यागंचित्तगताग्रागादिदोषादवश्यंभवतिसचेदृष्टोज्ञानेननोशितस्त
र्हिसुषुप्तादिसदृशोवास्यास्थिरोभवतिसैवमोक्षइतिनन्ववासनात्वबीजसत्वेपिवैराग्यादिनावासनाक्षीणा

दर्शीकारवृत्तिःसमाधौमाभवतुसुषुप्तेतुवास्तव्यावस्थादर्शनंभविष्यतीतिसुषुप्तेर्वस्तुत्वमितितत्राह॥ वासनायास्त
पनंदोषयोगेविनानिमित्तस्यप्रधानबाधकत्वेन॥ यथावैराग्येतत्यागनिमित्तदोषयोगेपिसतिवासनायानस्वार्थत्यागेनभवतीत्य
र्थः। बलवत्तरएवहिदोषोवासनादुर्बलांस्वकार्यंकुंठंकरोतीतिभावः। वासनयेतिपाठेवासनयायत्पुरुषस्यस्वार्थत्याग
नेतंनभवतीत्यर्थः संस्कारलेशतोजीवन्मुक्तस्यशरीरधारणमितितत्तीयाध्यायेवक्ष्यतेतत्रायमाक्षेपः जीवन्मुक्तस्यशरी
रेकस्मिन्नपर्यंतस्मरणादीनामिवलोभोनोदृश्यतेसोनुपपन्नः प्रथमंभोगमुत्पाद्यैवपूर्वसंस्कारनाशोवात्मज्ञानेनसर्वापेक्ष
यावसंस्कारोत्सत्यंभवतत्तद्धतत्तत्फलस्यशरीरादेर्वात्मसत्वस्यविषयभोगादितितत्राह॥ एकःसंस्कारक्रियानिवर्तकोन
नुप्रतिक्रियंसंस्कारभेदेबहुकल्पनाप्रसक्तेः येनसंस्कारेणदेहादिशरीरभोगप्रारब्धःसएकएवसंस्कारस्तच्छरीरसाध्य
स्यप्रारब्धभोगस्यसमापकः सचकर्मवदेवभोगसमाप्तिनाशेननुप्रतिक्रियंप्रतिभोगंशक्तिसंस्कारनानात्वंबहुशक्तिकल्पना
जीवन्मुक्तस्यादित्यर्थः। कुलालचक्रत्वेभ्रमणस्यलेप्यैवंवेगाख्यःसंस्कारएकएवभ्रमणसमाप्तिपर्यंतस्थायीबोध्यः। अत्रिर्जी
शरीरमत्तीत्युक्तेतत्रबाह्यबुद्ध्यभावाच्छरीरत्वंनास्तिकाक्षेपमपाकरोति॥ नबाह्यबुद्धिनियमोदृष्टोल्लालोष्टिवनस्पति
त्वगोहदादीनामपिभोक्तृभोगायतनत्वंप्रवर्तते॥ नबाह्यज्ञानंयत्रास्तितदेवशरीरमितिनियमःकिंतुदृष्टादीनामंतःसं
नामपिभोक्तृभोगायतनत्वंशरीरत्वंमतंयतःपूर्ववत्सर्वोभोक्तृभोगायतनत्वंशरीरमितिभावः तदेव

वृक्षादिशरीरेष्वपि सुप्तबालादिकमित्यर्थः। तथा च श्रुतिः। अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादिरिति नयात्मबुद्धि
नियमकृदित्यशास्त्रीयत्वपक्षेऽपि सत्त्वमेवेदमनुदर्यमयादिति वाध्यंसूत्रे श्रा॥शरी
रजैः कर्मदोषैर्यौतिस्पावरान्तानाः। वाचिकैः पक्षिमृगतांमानसैरंत्यजातितामित्यादिस्मृतेरविभोक्तृभोग्यायतनत्वमित्यर्थः
॥ननुवृक्षादिष्वप्येवंचेतनत्वेन धर्मधर्मीसत्तिप्रसंगस्तत्राह॥नदेहमात्रतः कर्माधिकारित्वंवैशिष्ट्यश्रुतेः॥ ॥नदेहमात्रेण
धर्मधर्मीसत्तियोग्यत्वंजीवस्यकुतः वैशिष्ट्यश्रुतेः ब्राह्मणादिदेहविशिष्टत्वेनैवाधिकारश्रवणादित्यर्थः। देहभेदेनैवक
र्माधिकारंदर्शयन्देहत्रैविध्यमाह॥ ॥त्रिधात्रयाणांत्ववस्थाकर्मदेहोपभोगदेहभयदेहाइत्यर्थः। तत्रकर्मदेहः परमश्रीणां
भोगदेहइंद्रादीनांस्थावरादीनांतुभयदेहोनजीर्णाप्रीतिः पुत्रपाध्यन्नेनत्रिधातिभागः अस्यपाससर्वस्यैवभोगदेह
त्वापत्तेः। चतुर्थमपिशरीरमाह॥ ॥नकिंचिदप्यनुशयतः॥ विषादनुशयंद्वेषपश्चात्तापानुतापयोरितिवाक्षादनुशयोत्रवैर
ग्यविरक्तौश्वरस्यमेतत्त्रयेनकिंचिदपिएतत्त्रयविलक्षणमित्यर्थः। यथाऽक्तात्रयजडभरतादीनांतेषांस्नानमात्रप्रधान
कृत्वादितोऽतस्तेस्वात्मावस्थस्थापनायपरमभुपगतंस्नानेछाकृत्यादिनित्यत्वप्रतिषेधति॥ननुछादिनित्यत्वमात्रा
श्रयविशेषपरिकल्पनावुद्धिरात्मावस्थायास्यात्सूतिः तथाचस्नानेछाकृत्यादीनांनित्यत्वमाश्रयविशेषपरिकल्पनयाचोपपद्यते
नयाभ्युपगतेतिनास्तिश्रुतिवुद्धिरुक्तौतेनसर्वेषामेववुद्धीछादीनांप्रनित्यत्वानुमानात्तथालोकिकवत्किंदृष्टांते ५५

नावरणतेजसोपिनित्यत्वानुमानमित्यर्थः। आर्त्तोगावत्स्नानेछादेर्नित्यत्वंतथाश्रयईश्वरेपाधिरवासिद्धईश्वरस्यासिद्धे
रित्याह॥ ॥आश्रयासिद्धेश्च॥ ॥सुगमोनत्वेवंवृत्तांगादिसर्जनसमर्थेसार्वज्ञादिकैकरूपंजन्यंसमाधेतापिलोकेतापश्चा
दिभिरेवमैश्वर्यादर्शनादितितत्राह॥ योगासिद्धयोव्योषधादिसिद्धिवन्नाप्तलपनीयाः॥ औषधादितिसिद्धिदृष्टांतेनयोग
जाअप्यणिमादिसिद्धयःसाध्याघृपयोगिन्यःसिध्यंतीत्यर्थः। पुरुषासिद्धिश्रुतिकूलतयाभूतचैतन्यवादिनंप्रत्याहदृष्टे॥ ॥नभू
तचैतन्यंप्रत्येकादृष्टेःस्मृतेपिच॥ सहतभावाच्चस्याथाप्रविपंचभूतेषुचैतन्यंनास्तिविभागकालेप्रत्येकंचैतन्यादृष्टिरित्य
र्थः। तृतीयाध्यायेचैवंसत्सिद्धांतविधयोनूक्तत्वपरमतनिरुत्तरणायेतिकोनरूपदोषायेति। वीक्षावाध्यायसमाप्तौ॥स्व
सिद्धांतविरुद्धार्थभाषित्वेत्रवादिनःपंचमेतान्निराकृत्यस्वसिद्धांतोदृढीकृतः॥ ॥इतिविज्ञानाचार्यविरचितेकापिलसांख्यप्रव
चनस्यभाष्येपरपक्षनिर्जयोध्यायःपंचमः॥ ॥अथाध्यायवतुष्केनसमस्तशास्त्रार्थंप्रतिज्ञायपंचमाध्यायेपरपक्षनिराकरणेन
प्रसाध्येदानीन्तमेवसाधुभूतंशास्त्रार्थंषष्ठाध्यायेनसंकलयनुपसंहरतिऽतआत्यंतिकोहिपुनस्तत्रावेविस्तारकृतेशिष्याणांप्रसंदि
ग्धाविपर्यस्तोदग्धोवोधस्तत्यतइतिप्रतास्पदानिरचनेनन्यायादनुक्तमुक्तंचोपन्यासंश्रयादनुक्तंयुक्तंचोपन्यासंचक्ष्ना
त्रकोनरुक्तंदोषायाअस्त्यात्मानास्तितत्साधनाभावात्॥ ॥जानामीत्येवंप्रतीयमानत्वात्पुरुषःसामान्यतःसिद्धएवात्रिवाधक
प्रमाणाभावात्प्रतस्तद्विवेकमात्रंकर्तव्यमितिप्रत्यर्थः। तत्रविवेकेहेतुद्वयेनसाध्यतिः। देहादिव्यतिरिक्तोसौवैधर्म्यात्॥ असौअ

ता यां पंचम्यो यथा दुःखेऽहोबलवत्तरः मैवं सुखेऽपि लाभो बलवत्तरः मैवं सुखेऽपि लाभो बलवत्तरो विषाद
क्षया दुर्बलेक्षया इत्यर्थः तृष्णा च सुखाप्तिलाभं वाधित्वा पि दुःखं हंति दुःखनिवृत्ता वेवेच्छा जनयतीति न
तुल्यायत्वयत्नसिद्धिरिति तदुक्तं लौकिकैः प्रभूतेनाभंगभयेन साधुमोक्षस्यप्यभिवृष्यवलं वा तेऽपीति या तुनर
कादिदुःखदर्शनेऽपि सुरक्षत्रृप्तिः सागरादि दोषवशादेवेति सुखापेक्षया दुःखस्य बहुलत्वात् तत्रापि दुःख
स्य बहुलत्वात् तत्रापि दुःखनिवृत्तिः पुरुषार्थ इत्याहकुत्रापि कोपि सुखीति ॥ ग्रहनेतरतृणवृक्षपशुपक्षिमनुष्यादिषु मध्ये
खल्वो मनुष्यदेवादिरेव सुखी भवतीत्यर्थः इतिहेतोस्तत्रापि कदाचित्केसुखंमधु संपृक्तान्नवदिकारकारणं हेयमेवेत्या
हतत्रापि दुःखमिश्रितमित्यतो दुःखकोटौ सुखदुःखविवेचकानिक्षिप्तं इत्यर्थः तदुक्तं योगसूत्रैरेव परिणामतापसंस्का
रदुःखैर्गुणवृत्तविरोधाच्चसर्वमेवदुःखं विवेकिनइति विष्णुपुराणेपि ॥ यच्चस्त्रीति कुरुं पुंसावस्तुमैत्रेय जायते तदेव
दुःखवृक्षस्यबीजत्वमुपगच्छतीति केवलदुःखनिवृत्तिर्नपुरुषार्थः किंतुसुखेपरकृतिमतमपाकरोतिसुखलाभभावादपु
रुषार्थत्वमितिचेन्नैवं विधमात ॥ ॥ सुखलाभाभावान्नोक्तात्यदुःखाभावस्यः पुरुषार्थत्वमितिचेन्नपुरुषार्थस्यहेविधात्
विध्रकारकत्वात्सुखस्यदुःखाभावत्वाभावेत्यर्थः सुखीस्यादुःखीमास्यामितिहिप्रयोगवलीकानांप्रार्थनादृश्य ११म
५२

तइतिशंकतेनिर्गुणत्वश्रुतेरात्मनोसंगत्वादिश्रुतेः नन्वात्मनोनिर्गुणत्वंसुखदुःखयोश्चित्तगुणप्रत्यत्वेनित्यमेवसि
द्धेप्रसंगत्वश्रुतेर्विकारहेतुसंयोगाभावश्रवणात्तेविनाचगुणानांविकारासंभवात्भ्रान्तीयत्वेनसंभाव्यानांचगुणानां
जन्यत्वेनैवानुभवात्प्रादिशदेननिर्गुणत्वादिश्रुतयोयाताः प्रनोनित्यसिद्धिस्वभावत्वान्नदुःखनिवृत्तिरपिपुरुषार्थोघट
तेइत्यर्थः ननुसंगंविनास्यमेतद्विकारोभवतीतिचेन्नदाहस्यनानलोवकेनापःक्लेदस्यचोभसः तदृत्यमेवात्रदुःखंविकी
रायतेवेयतः किंचस्वयंविकारिस्वभावेनैवोपपद्यतेस्वयंक्लेदविकारेणपुनर्वैधर्म्यप्रसंगात्तस्मात्तपाचोक्तंकोभाय
प्यात्मनिमलिनोस्वच्छोविकारीचेत्स्वभावतः नहितस्यभवेन्मुक्तिर्जन्मांतरशतैरपीतिस्मरणेन ॥ अधर्मत्वेपितस्मिन्
रविवेकान ॥ सुखदुःखादिगुणानांचित्तधर्मत्वेपितत्रात्मनिसिद्धिः प्रतिबिंबरूपेणावस्थितिरविवेकान्निमित्तात्यत्कृति
पुरुषसंयोगधारेत्यर्थः एतच्चप्रपंचमाधायेप्रतिपादितंनिमित्तत्वमविवेकस्यदर्शयतिरतिस्तीयाध्यायस्त्रेणेतितथा
चस्फटिकेलौहित्यमिवपुरुषेप्रतिबिंबरूपेणदुःखसंक्रांतेतन्निवृत्तेरपुरुषार्थः प्रतिबिंबाकारदुःखसंबंधस्यैवभोग
यप्रतिबिंबरूपेलेदुःखस्यौपचारिकत्वात्दुःखमभुंजानेतिपार्थनादितिप्रविवेकस्यकः पुरुषगुणबंधः प्रविवेकस्तुकिंन्
लक्षणमाकांक्षायामाहः प्रनादिरविवेकोन्यथाकल्पेषदृश्यप्रसंगः प्रगृहीतासंसर्गस्तुभयविषयकंज्ञानमविवेकः स
चप्रवाहरूपेणानादिर्विवेकेनधर्मःप्रलयेवासनारूपेणनिष्टतिश्चन्यथात्यसादित्येदोषदृश्यप्रसंगात्सादित्वेहिस्वतएवोत्पाद

मुक्तस्यापि बंधापत्तिर्मुक्त्यभावश्च कर्मादिजन्यत्वेन कर्मादेः प्रत्यक्षितस्य कारणत्वानुपपत्तिरित्यर्थः॥ अथ ब्रह्मविवेकोत्पत्तिरूपः प्रतिबंधात्मनापुरुषधर्मत्वं भवतीत्यतः पुरुषस्य बंधप्रयोजकत्वं तिष्ठतु तावन्नित्यमुक्तस्यापि पुनर्बंधप्रसङ्गादित्याह॥ ननित्यस्यात्मवत्प्रध्वंसानुच्छित्तिः॥ आत्मवन्नित्यो ऽबंधनादि भवतिकिंतु प्रवाहरूपेण नादिरध्वंसानादिभावस्यतस्य श्रुतिसिद्धोक्तिरनुपपत्तेरित्यर्थः॥ बंधकारणमुक्तमोक्षकारणमाह॥ प्रतिनियतकारणनाश्यत्वमस्य ध्वंसवत्॥ स्वबंधकारणस्याविवेकस्य मृद्भेदजलादिस्थलेप्रतिनियतेयत्नाश्यकारणंविवेकस्तन्नाश्यतेतरो वत्॥ बंधकारणंहि प्रतिनियतेनलौकिकेनैवनाश्यतेनान्यसाधनेनेत्यर्थः॥ तदुक्तंविष्णुपुराणे॥ अंधंतमः दीपवद्भेदि योऽबंधयाख्यस्तथात्मनः॥ विवेकजन्मनिःश्रेयसंतस्यापि प्रतिनियमस्य ग्राहकमप्याह॥ प्रत्यविप्रतिनियमोन्वयव्यतिरेकाभ्यां॥ ध्वंसालोकयोरिवप्रकृतेपिप्रतिनियमः मृद्भेदजलादिष्व न्वयव्यतिरेकाभ्यामेवग्राह्य इत्यर्थः॥ प्रयोगश्चैवं ब्रह्मविवेकेननुविवेकस्यापिकिंप्रतिनियतंकारणमस्तिनवातत्राह॥ प्रत्यविविवेकेविकारणनियमेन्वयव्यतिरेकाभ्यामेवकारणनियमसिद्धः श्रवणमननिदिध्यासनरूपमेवकारणंनतुकर्मादीतिकर्मादिकंनतद्विरोधमेत्यर्थः॥ बंधस्यसाभाविकत्वादितंनसंभवतीतिप्रत्यभाधायोक्तंस्मारयतिप्रकाशंतत्संभवादिति विवेकएवबंधः॥ बंधोहिदुःखंतत्कारणंच बंधस्यकारणंशोकंसुखंचनानुभवेरपिकार्यतयाविनाशापत्त्याऽनबंधस्यादिति

तत्राह॥ ननुमुक्तस्यपुनर्बंधयोगोप्यनावृत्तिश्रुतेः॥ भावकार्यस्यैवविनाशितयामोक्षस्यनाशोनास्तिनसपुनरावर्ततइति श्रुतेरित्यर्थः॥ प्रविशद्यः पूर्वस्वोक्तपक्षसमुच्चये॥ ॥ प्रपुरुषार्थत्वमस्यापि॥ प्रस्यापिमुक्तस्यापिपुनर्बंधेप्रत्यवे वृत्तमोक्षस्यापुरुषार्थत्वंपरमपुरुषार्थत्वाभावःस्यादित्यर्थः॥ प्रपुरुषार्थत्वेहेतुमाह॥ प्रविशेषापत्तिरुभयोः॥ भाविबंधक्षयेणोभयोर्मुक्तबद्धयोर्विशेषानवगमात्तुल्यापुरुषार्थत्वमित्यर्थः॥ ननुबंधमुक्तयोर्विशेषाभ्युपगमेनित्यमुक्तस्वरूपमुच्यतेतत्राह॥ मुक्तिरनाद्यध्वंसेनपरः॥ वक्ष्यमाणेनानाद्यध्वंसादतिरिक्तः पदार्थेनमुक्तिरित्यर्थः॥ प्राग्भावमुक्तस्यापि कस्यजनोपाधिनिमित्तंरजतत्वंशौक्त्यावरणरूपंविघ्नमात्रेणनतुजनकत्वधानेनशौक्त्येनशक्त्यपाधिनेवनष्टंतिजनकत्वंशौक्त्यंतत्वैवस्वभावनिर्दुःखस्यात्मनोबुध्युपाधिकदुःखप्रतिबंधनद्वारकरूपविघ्नमात्रंनतु बुध्युपाधानेनदुःखंजायतेतदपायेचनश्यतीतिश्रुतेर्नित्यमुक्तआत्मा बंधमोक्षौतुव्यावहारिकौचित्तविशेषइति॥ नन्वेवंबंधमोक्षयोर्नित्यत्वेमोक्षस्यापुरुषार्थत्वंतदर्थिनांदिवृत्तिपादकश्रुत्यादिविरोधइत्यतआहप्रतत्राप्यविरोधः॥ तत्राविप्रतिरायध्वंसस्यमोक्षत्वेपिपुरुषार्थत्वाविरोधइत्यर्थः॥ दुःखयोगादेवहिपुरुषःकल्पितौनतुदुःखयोगोपिभोगप्रवृत्तिविरूपेणदुःखंबंधइतिप्रतिविरूपेणदुःखनिवृत्तिरिष्टा यैवपुरुषार्थैः॥ सएवतारायध्वंसःतादृशश्चामोक्षोपिपुरुषार्थएवेतिभावः॥ इतःपरंतृतीयाध्यायोक्तस्यज्ञानसाधनस्याष्टधाजस्योपसंहारःकर्तव्यइत्यत्रश्रवणेन

न संस्कृतेनैवमनसा साक्षात्कारसंभवात्तयोगवैयर्थ्यमित्याशंक्याह अधिकारभेदेनेति। अधिकारभेदो विधानाधिकारेण तेन श्रवणमननसाक्षात्कारः सर्वेषामिति नियमस्तात्पर्यः किं नकोमलबुद्धीनामपि साक्षात्कारे नदाद्ध्यायश्रवणादिउत्तरसाधनानां नियमइत्याह॥ अन्यथेत्युत्तरार्धं॥॥ श्रवणमननन्यायस्तत्रैवोक्तो निदिध्यासनादीनां ज्ञानस्य मिथ्याज्ञानानभिभवरूपदार्ढ्यार्थं नियमइत्यनुपज्यातउत्तरत्रैव सा धनान्याह। स्थिरसुखमासनमिति ननियमः। प्रासने सत्यासनादिनियमो नास्तीत्यतः स्थिरं सुखं यत्तदेव प्रासनमि त्यर्थः मुखंसाधनमाह। ध्यानं निर्विषयं मनः॥ इतरवृत्तिप्रत्ययदंतः करणं भवति तदेव ध्यानेयोगश्चित्तवृत्तिनिरो धरूपइत्यर्थः कार्यकारणभेदेन कारणशब्दः कार्येप्रयुक्तः। एतत्साधनत्वेन ध्यानस्य वक्ष्यमाणत्वादिति। ननुयोग योगयोः पुरुषस्यैक्यरूप्यात्किंयोगेनेत्याशंक्याह तत्फलतद्धेतुसत्त्वेवफलांतरमप्याह। उभयथाप्यविशेषश्चेन्नेवंउपरा गनिरोधाद्विशेषः॥ योगायोगयोः पुरुषस्याविशेषइति चन्नैवं यतउपरागनिरोधानदुःखात्मकवृत्तिप्रतिरोधोपरागा त्योगावस्थायामयोगावस्थातोविशेषः पुरुषस्यास्ति ननुनिःसंगेकूटस्थेपुरुषेपरागस्तत्राह॥ निःसंगेष्वपरागोविवेकात्॥ ॥निःसंगेष्वपिपुरुषेपरागोनास्तितत्राविद्योपरागइवभवतीतिकृत्वाप्रतिबिंबएवोपरागइतिव्यवहियतेऽपरागा विवेकिभिरित्यर्थः। एतदेवविवृणोतिजयास्फटिकयोरिवनोपरागः किंत्वभिमानः। यथाजपास्फटिकयोर्नोपरागः किंतु जपाप्रतिबिंबवशादुपरागाभिमानमात्रं रक्तः स्फटिकइतितथैवबुद्धिपुरुषयोर्नोपरागः किंतुबुद्धिप्रतिबिंबवशादुपरागा

भिमानोविवेकवशादित्यर्थः। अतउपपन्नतुल्यतयावृत्तिप्रतिबिंबएवपुरुषेविद्ययोपरागइत्युच्यतेपर्यवसितोर्थः तथा चस्फटिकेयथा जलेचंद्रमसः कंपादिस्तत्कृतोगुणः दृश्यतेतद्वापि दुःखात्मनोनात्मनोगुणइतिएवंरूपंदुःखात्मकवृत्तेरु परागेदुःखनिवृत्यात्मकमोक्षस्यांतरायस्तस्यचध्वंसः चित्तक्षेपान्तरायाविद्यादयश्चचित्तवृत्तिनिरोधेनासंप्रज्ञातयोगेनेत्युक्तो योगोदेवांतरायध्वंसोभवतीतियोगशास्त्रस्यापिसिद्धांतः। ध्यानंनिर्विषयंमनइतियोयोगउक्तस्तस्यसाधनमाचक्षाणएवय मेवोक्तौपरागस्यनिरोधोपायमाह॥ ॥ध्यानधारणाभ्यासवैराग्यादिभिस्तन्निरोधः॥ ॥स्मृतिद्वारध्यानंयोगस्यकारणंध्या नस्यचकारणंधारणातस्याश्चकारणमभ्यासस्तस्यैर्यसाधनानुष्ठानंअभ्यासस्यापिकारणंविषयवैराग्यंतस्यापिदोषदर्शन मितिपातंजलोक्तप्रक्रियातत्रेदंध्यानंनिरोधोभवतिचित्तवृत्तिनिरोधात्मकद्वारइत्यर्थः। चित्तनिष्ठध्यानादिनापुरुषस्यो परागनिरोधेपत्रीचार्यसिद्धांतंदर्शयति॥ लयविक्षेपयोर्व्यावृत्त्येत्यत्रार्थे॥ ध्यानादिनाचित्तस्यनिद्रावृत्तेः प्रमाणादिवृत्तेश्च निवृत्यापुरुषस्यापिवृत्त्युपरागनिरोधोभवतिबिंबनिरोधेप्रतिबिंबस्यापिनिरोधादिति पत्रीचार्योक्तिरित्यर्थः। पक्षांतंज लिःयोगश्चित्तवृत्तिनिरोधः। तदाऽऽत्मनः स्वरूपेऽवस्थानं वृत्तिसारूप्यमितरत्रेतिसूत्रत्रयेणैतदेवाह॥॥तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः॥ ॥तत्प्रतिषेधः सर्वत्रग्राह्यात्मबुद्धिसन्निधिमात्रतया॥ ॥यत्रयत्रमनोभवेत्तबुद्धिरात्मातद्बुद्धिहेयतत्त्वादिस्मृतयोव्येतत्प्रतिषेधार्थाइतिनेदंवेसंप्रज्ञातयोगोदेव साक्षात्कारद्वारामोक्षांतरायध्वंसद्वारेतिप्रत्यक्षत्वात्। ध्यानादौगुणदोषस्याननियमोनास्तीत्याह॥ नस्यानियमस्त्रिप्तप्रसादात्॥

चित्तप्रसादादेर्ध्यानादिक्रमतस्तत्त्वगुरुलिङ्गादिस्थाननियमइत्यर्थः॥ शास्त्रेत्वौत्सर्गिकाभिप्रायेणैवारण्यगिरिगुहादिस्थाननियमो
क्तोद्दिष्टमितिचेत्। अतएववृत्तसूत्रमपि॥ यत्रैकाग्र्यंततोविशेषादिति। समाधौ तोक्तविचारइदानीं पुरुषापरिणामित्वंप
जगत्कारणमुपसंहरति॥ प्रकृतेरुपादानत्वाप्रत्येकंकार्यत्वश्रुतेः। मृत्पादयोघटकार्यत्वश्रवणेतेषांमृत्कारणतयाप्रकृतिसि
द्ध्यतीत्यर्थः। ननुपुरुषएवोपादानंभवतुतत्राह॥ नित्यत्वेपिनात्मनोयोग्यत्वाभावात्। गुणत्वंसर्गित्वंचोपादानयोग्यतातयोर्भावात्
।पुरुषस्यनित्यत्वेपिनोपादानत्वमित्यर्थः। ननुवर्कोःप्रजाःपुरुषात्सप्रसूतइत्यादिश्रुतितःपुरुषस्यकारणत्वाच्चगमात्तद्विद्धीदि
वादाश्रमलीयादित्यंशंकाह॥ श्रुतिर्विरोधान्नकुतर्कोयंसदस्यात्मलाभः॥ पुरुषकारणतायांयेयेपक्षाःसंभाविताःसर्वेश्रु
तिविरुद्धाइत्यतस्तदभ्युपगंतृणंकुत्सार्किकाश्चमानमात्मस्वरूपज्ञानंनभवतीत्यर्थः। एतेनात्मनिसुखदुःखादिगुणोपादानत्ववाद्यपि
निकुतार्किकाएवृत्तेजाप्रव्यात्मयथापर्ज्ञानंनास्तीत्यवगंतव्यंश्रात्मकारणतांश्रुतयश्चशतिशतिप्रदभेदेनोपासनार्थाएवंप्रजा
पेकामित्यादिभिःश्रुतिभिःपृथानकारणतानिर्देक्ष्यतेकाशस्याभ्राघयिष्यनकारणतावदात्मनःकारणत्वमुच्यतेतदातन्न
निराकुर्मःपरिणामस्यैवप्रतिषेधादितिस्यादेवंजगन्मात्रेश्रुत्यादीनांपरंपरयाकारणत्वेविवक्षितेश्रुप्रधानस्यानुगमादुपादानत्वप्रसक्तंयथांकुरादि
घटकत्वेपिस्यादेवमत्रेश्रुत्यादीनामनुगमादुपादानत्वमित्यर्थः। वनन्यायेनप्रकृतेर्योपकरणमाणमात्रंसर्वत्रकार्य

FOLIO NO. 96 MISSING.

पुरुषो विचेति घ्रुम्भामप्यंगीकृताभ्यामपेक्षितप्रमाणस्यश्रुतेर्विरोधस्तदवस्थएवेत्यर्थः अपरमपिदूषणमाह॥ घ्रुम्भामप्यविरो
धान्नपूर्वमुत्तरंवसाधकाभावात्॥ घ्रुम्भामप्यंगीकृताभ्यांपूर्वंपूर्वंप्रमाणमुत्तरंवाधकमितिनघटतेस्माभिरपिप्रकृतिः पुरुषश्चेति
द्वयोरेवागमोक्ततत्विकारस्यचसारंभणमात्रेणमात्रत्वेनानित्यतारूपासत्यस्यस्माभिरंगीकारात्॥ननुप्रकृतपुरुषनामानावस्तीकृतस्य
कृतेर्नित्यत्वस्वीकाराच्चेत्वेवास्मद्धेतोर्धर्तिरेवेत्यर्थः॥ भेदस्यचिद्रूपस्यतेनसतःसिद्धत्वेरूपकारमार्थिकसत्ताभावस्यास्माभिरप्यनि
राकरणात्॥ भेदस्याधिकरणस्वरूपतयाचेतनानामन्योन्यभेदस्यचिन्मात्रस्वरूपत्वाच्चप्रकृतिनित्यतापाःप्रवादांतरत्वादितिभवेन
दूषणांतरमाह॥ उत्तरंचेत्यादिना॥ चैतन्यादिनाभुत्तरंसिद्धांतस्यनघटतेऽयमत्रसाधनप्रमाणस्यास्माभिरंगीकारेचैतन्येवाधेयत्वेने
त्यर्थः॥ ननुस्वप्रकाशत्वात्मनस्तत्वमेवनत्वाह॥ ॥प्रकाशात्मसिद्धौकर्मकर्तृविरोधः॥ ॥चैतन्यरूपप्रकाशात्मैवतस्यसिद्धौक
र्मकर्तृविरोधस्तस्यःप्रकाशप्रकाशसंवेद्यविषयसंवेदनकर्मभेदात्संवेदनोत्पत्तेरिवेतिचेन्नप्रकाशस्यस्वप्रकाशत्वेनस्वसंवेद्यत्वात्॥
प्रकाशंगीकारात्तद्वारास्वप्रतिबिंबरूपस्यस्वस्यविंबरूपेस्वस्मिन्संवेद्येघटतेयथासूर्यजलघटाप्रतिबिंबरूपस्वसंवेद्यति
भावः॥ आत्मनःस्वप्रकाशत्वश्रुतिस्तत्वन्योन्याधिकरूपप्रकाशादिपक्षेधानुपपत्तेरुक्तेः॥ ननुप्रकृतेस्तस्यकर्तृभावोविषयविषयिभाव
वतस्यचाभेदेपिशक्तिविरोधःसंवेद्यत्वेसदित्यादिरूपाघटादनुमानाच्चज्ञायमानस्यज्ञानस्यचविषयत्वादितिभवप्रकारभे
दनतत्रापिविषयविषयिलोभेदात्तत्वत्वादिस्वभावस्यरूपेणविषयत्वमविषयित्वाचसंवेद्यत्वेनसदित्यादिरूपेणेतिचेन्नसंसाध्य

त्वरूपेणप्रत्यक्षेपिज्ञानत्वाप्याकारेणविषयत्वाज्ज्ञानमीत्यादिरूपेश्चविषयितेतित्रापित्तभेदोनपुंप्रकाशस्वरू
पस्यस्माक्षात्त्वविषयत्वेतिप्रकारभेदोपेक्षाविरोधः॥ एतेनलौकिकप्रत्यक्षरूपहानेनामविस्तविषयत्वेनसंभवतिप्रका
रभेदाभावात्प्रत्यक्षेविषयत्वंहेतुत्वाच्चेतिदूषणंनतुनास्तिकर्मकर्तृविरोधः॥ स्वनिष्ठप्रकाशधर्मत्वात्स्वस्यस्वसंवेद्यसं
भवात्॥ यच्चान्येशक्तिकार्यंस्वनिष्ठज्ञानकारणत्वंस्वस्यसंवेद्यमितितत्राह॥ ॥जडोव्याहतोजडंप्रकाशयतिविदुषः चेतनेप्रकाशस्य
धर्मःसर्वदिचिदेवनास्तिकिंतुविदुषः॥ चित्त्वस्वरूपत्वंपरार्थोजडंप्रकाशयतिसचजडोव्याहतइतिमात्रेणचिदित्युच्यतेनतुजडोविलक्ष
णधर्मवत्त्वेनेत्यर्थः॥ अतएवनिषेधप्रतियोगित्वेनेतीत्येवमुक्तोपपद्यतेतेनतुविदुषश्चेतनत्वेतिताबस्थ्यंतिरस्कृतमिति
निर्देष्टुंगुरुणापिनशक्यतइतिजडोव्याहतइतिविशेषोक्तिर्नोपपद्यतेत्यत्रवार्थः॥ अस्मिन्पक्षेजडंप्रकाशयतिविदुषोनत्वा
त्मानमितिनार्थःतत्पक्षसंतिहितस्यानेपत्वेनसधर्मकभावरूपवाधकंपरत्वमासाद्यहंस्वस्यापितुल्यन्यायत्वादितिनत्वेवंप्र
माणमनुरोधेनद्वैतसिद्धेरद्वैतश्रुतेर्गौण्याःकिंप्रयोजनमितितत्राहानश्रुतिविरोधोगौण्यापतत्तिसिद्धेःनिःप्रयोजन
त्वेहेतुश्रुतिरितिपक्षेनास्तुनास्तिगौण्युत्पत्तिरतोवेदान्तायैवश्रुतिरितिचेन्नतथात्वेपुरुषज्ञानस्यवैफल्यापत्तेः॥ भावत्ता
नेस्वतंत्रफलांतरश्रवणंतत्रवेदांतसदसद्वैतैवोपपद्यतेसत्यंचकूटस्थनित्यंश्रुतएवश्रुतिरपिसदेवसोम्येदमग्र
आसीदेकमेवाद्वितीयमित्यादिनासदद्वैतमेवबोधयंत्यद्वैतप्रतिपादितस्तोतिभावः॥ केवलमुक्तौवादेवादिनोहेयाः॥

>प्रविलुजगत्सत्यता ग्राहकप्रमाणेनापीत्याह॥ ।।जगत्सत्यत्वमदृष्टकारणजन्यत्वात्‌ वा धकाभावात्‌॥ ५निद्रादिदोषदु
ष्टांतः करणादिजन्यत्वेनस्वप्नविषयशशत्वादीतिमादीनामसत्त्वेलोकदृष्टांत्वे महदादिप्रपंचेनास्तितत्कारणस्वप्नकूटेहिरण्य
गर्भबुद्ध्याप्युक्तानुपपत्तिमत्त्वयादित्यादिश्रवणतननुनेहनानास्तिकिंचनेत्यादिश्रुत्यावाधितत्वेनाविद्यादिना कश्चि
न्नानादिदोषाःकल्पनीयस्तत्राह५वाधकाभावादिति>प्रपंचाभावःनेहनानास्तिकिंचनेत्यादिश्रुतयोयाःपरैः प्रपंचबाधक
तयाऽभिप्रेयंतेताःप्रकरणानुसारेणविभागादिप्रतिषेधपरत्वेननुप्रपंचात्यंतनुच्छतापत्तेःस्वस्यापिवाधापत्तास्वाप्की
साधकत्वप्रसंगात्‌नहिस्वप्नकालीनशशदृंगवाचेतनोवितेष्वर्थेषुनर्नंदयतीतितस्मात्‌स्वविधातकतयाश्रुतयो
नप्रपंचस्यात्यंतबाधपराइति>प्रतएवदृष्टांतस्तत्रमयिवैधर्म्यान्नस्वप्नादिवदितितत्रनेहनानास्तिकिंचनेत्यादिश्रुतेर्वि
स्तविभक्तेकिमपिनास्तीत्यर्थात्‌सर्वंसमाप्तोवितनोसिसर्वदृत्यादिस्मृत्येकवाक्यत्वादितिवाचारंभणंविकारोनामधेयंमृ
त्तिकेत्येवसत्यमित्यादिश्रुतेस्तुस्थिरतत्स्वपारमार्थिकसत्ताविरहेर्थैः>प्रत्यक्षादृष्टिरूदृष्टांतासिद्धेः नहिलोकेमृद्धिकाग
णप्रत्यंततुच्छत्वंसिद्धंयेनदृष्टांततास्यादिति।।नन्विहोपनिषत्सुनिर्वक्तोनचसाधकः।।नमुमुक्षुर्नैमुक्तःकृत्येषापरमा
र्थतेत्यादिश्रुतेस्तुआत्मातिरिक्तस्यकूटस्थनित्यतारूपातिपरमार्थत्वाविरहेर्थैः किंचात्मनोनित्यैकधाप्यभावेर्थैः
>प्रत्यक्षेनादृश्यत्वेनस्वमोक्षफलकत्वप्रतिपादनविरोधात्‌नहिमोक्षोमिथ्येतिप्रतिपाद्यमोक्षस्यफलमपरमार्थः प्रतिपादय राम

नीतिचाश्रौत्यैकश्रुत्यसाक्षात्पुरुषार्थसाधनत्वेनविधीयमानत्वात्‌ब्रह्मपूर्वमीमांसाभाष्येचैतत्प्रत्यक्षश्रुतयोस्वाभाविक्यावि
रत्याताःश्रुतिभाष्येषुनीतिदृष्टानकेवलंवर्तमानदशायामेवप्रपंचःसत्प्रविलुप्तइत्याहाप्रकाशतासंभवा
त्सदुपनिषः।।।।परंवैकूटयुक्तिभिरसदुत्पादासंभवात्सदभावेत्यादिश्रवणेसदेवोत्पत्तेःप्रागिदमेकमेवाद्वितीयंसदासीत्‌
योवैतद्धिरण्मयेनात्मवस्थामुपपादयतिसत्राभ्यां।। अहंकारःकर्तानपुरुषः।। अभिमानवृत्तिकमंतःकरणमहंकारःसा
वकृतिमान्‌अभिमानेनरत्नेवप्रायशःप्रवृत्तिदर्शनात्‌ननुपुरुषेपरिणामित्वादित्यर्थः पूर्ववद्धर्मादिकंवुद्धेरितिय
दुक्तंतदकस्मेवांतःकरणस्यवृत्तिमात्रत्वेनदर्शयेन।। विद्वत्सामान्यवृत्तिस्तत्कर्मजितत्वात्‌।। अहंकारस्यकर्तृत्वेपिभो
गाच्चेत्तेविपर्ययवस्त्रोभवति>अहंकारस्यसंहतत्वेनपरार्थत्वात्‌ननेवमन्यन्निष्टकृतेनकर्त्रन्यस्यभोगःपुरुषविशेषनियमोनस्या
त्तत्राहतत्कर्मजितत्वादिति>अहंकारेणसंजितंतस्मिन्नयत्कृतंतज्ज्यत्वाद्भोगस्तेस्यर्थः योहंकारोयंपुरुषमाद्यायाचे
त्तेहंमत्रेतिवृत्तिंकरोतितस्याहंकारस्यकर्तृत्वंस्यात्‌नत्वन्यस्तेनैवचकर्मणातत्रात्मनिभोगोज्यतेरितिनातिप्रसंग
इत्याशयः।।वृत्तलोकांतगतिप्रिनीतिनिष्कृतिरितिपदैर्नेकारणंदर्शयति।। चंद्रादिलोकेष्वहंतित्रिमित्तसंज्ञावात्‌
त्रिमित्तमस्यैककालप्रकर्षादिकंतुगम्यत्वानंउत्तरत्रोक्तवाक्षिजनोपदेशादनावृत्तिःस्यात्तत्राह।।लोकस्यनोपदेशात्ति
किंपर्ववत्‌।।यथापर्वस्थमनुष्यलोकस्योपदेशमात्रान्नास्तिकिंत्वानानिष्पत्तिरेवंतत्रोक्तस्यैलोकस्योपदेशमात्रात्तज

नानंतरं ननिष्पत्तिर्नियमेन भवतीत्यर्थः॥ ननु वेदवत्प्रत्यक्षलोकादनावृत्तिश्रुतेः कुतो गतिस्तत्राह॥ ॥ पारंपर्येणतत्सिद्धौ विमुक्तिश्रुतिः॥ "ब्रह्मलोकादिगतानां श्रवणमननादिपरंपरया ज्ञानसिद्धौ विषये नसपुनरावर्त्तते इत्यादिविमुक्तिश्रवणंनतुसाक्षादतिप्राप्तेरित्यर्थः। तत्प्रत्यक्षज्ञानस्य प्रायिकत्वादन्यलोकाद्विशेषइति॥ परिपूर्णत्वेप्यात्मनोगतिश्रुतिमुपपादयति॥ ॥ गतिश्रुतेश्चाव्यापकत्वेप्युपाधियोगाद्भोगदेशकालाभोक्तृत्वं व्यापकत्वेप्यात्मनोगतिश्रवणानुरोधेनभोगदेशस्यकालवशाल्लाभःसिध्यतीवोंमवदुपाधियोगेनेत्यर्थः यथाघटाकाशस्यपूर्णत्वेपिदेशविशेषगतिर्घटादुपाधियोगाद्व्यवह्रियतेतद्वैवेतिचश्रुतिः। घटसंवृताकाशंनीयमानेघटेयथाघटोनीयेतनाकाशंत द्वज्जीवोनभोपसर्पति।भोक्तुरधिष्ठानाद्भोगायतननिर्माणमितियदुक्तंतत्प्रपंचयति॥ अनधिष्ठितस्यप्रतिभावप्रसंगात्प्रतत्सिद्धिः॥ भोक्तुरनधिष्ठितस्यभ्रुक्देःप्रतिभावप्रसंगात्तस्यानधिष्ठितस्यसिद्धिःस्वकार्यभोगसंपादकत्वमित्यर्थः।ननुचाधिष्ठानेनिर्वैवादृष्टद्वाराभोक्तुर्भोगायतनंनिर्मीतेभवतुतत्राह॥ अदृष्टद्वाराचेत्प्रसंवर्द्धस्यतत्संभवाज्जलादिवदंकुरे॥ भुक्त्यदेसाक्षादसंवर्द्धस्यादृष्टस्यशरीरादिनिर्मीतेभोक्तृद्वारात्संभवात्वीजसंवर्द्धानांजलादीनामंकुरोत्पत्तौकर्मकारित्वदर्शनादित्यर्थः।अतःसाश्रयसंयोगसंवंधेनैवादृष्टसंवंधःभुक्त्यधिष्ठानेवक्तव्यः। तथाचसिद्धमदृष्टद्वारात्मसंयोगरूपस्याधिष्ठानस्यभोगोपकरणनिर्माणेकर्तृत्वमितिभावः।वैशेषिकादिनयनादृष्टद्वारकत्वमात्मकारणत्वंश्रुत्यापेक्षतत्संवंधद्वा रा

दृष्टतयात्मनोधिष्ठात्रित्वंस्यादपितंस्वसिद्धांतेत्वदृष्टादीनामात्मधर्मत्वाभावान्नद्वाराभोक्तृत्वमेवंनसंभवतीत्याह॥ निर्गुणत्वात्तदसंभवादहंकारधर्मीचेते॥ भोक्तृर्निर्गुणत्वेतादृष्टासंभवाच्चनादृष्टद्वारकत्वंहियस्मादेतेऽदृष्टद्वारकत्वंहियस्मादेतेऽदृष्टादयोऽहंकारस्यातःकरणसामान्यस्यैवधर्माइत्यर्थः। तथाचास्मन्मतेघारनैरपेक्ष्येणसंयोगमात्रेणसाक्षादेवभोक्तुरधिष्ठानेसिध्यतीतिभावः।ननुचेत्पुरुषाव्यावर्त्तकःतर्हिबालायशतभागस्यशतधाकल्पितस्यचाभागोजीवःसविज्ञेयःसंज्ञानेत्यायकल्पतइतिश्रुतिप्रतिपादितंजीवपरिच्छिन्नत्वमुपपन्नंतत्रेश्वरप्रतिक्षेपात्पुरुषाणांचैकरूप्याज्जीवात्मपरमात्मविभागोविशास्त्रीयोनुपपन्नइतितद्भ्रमाशंकाद्वयमपहर्त्तुमाह॥ ॥ विशिष्टस्यजीवित्वमन्वयव्यतिरेकात्॥ "जीवत्वंप्राणधारणयोरिति श्रुत्यासाजीवत्वंप्राणित्वंतच्चाहंकारविशिष्टपुरुषस्यधर्मःननुकेवलपुरुषस्यकुतःप्रत्ययव्यतिरेकादहंकारवत्तामेवसाभ्यक्तिरित्यायप्राणधारणयोर्दृष्टेर्जीवात्तच्छब्दानांचचित्तवृत्तिनिरोधस्यैवदर्शनात्पूर्वहेतुरागोत्पादकस्याहंकारस्याभावादित्यर्थः।प्रत्यक्षतः करणविशेषोमोक्षेप्रलयादौनजीवनंतद्योगेचजीवनमितिचैवमन्वयव्यतिरेकौव्याख्येयौ तस्मात्तानःकरणोपाधिकंजीवत्वंपरिच्छिन्नत्वंपरमात्मात्यन्तकेवलपुरुषातभिन्नत्वंचस्वतस्तुपूर्णत्वंपरमात्मत्वंचेतिभावःअनेनरूपेणविशिष्टस्यभोक्तृत्वंवात्वमहंप्रत्ययोचरत्वंवानोक्तंसाक्षात्काररूपस्यभोगस्याहंकारधर्मत्वाभावात्त्वमहंधर्मिपुरस्कारेणविवेकानुपपत्तेश्चेतिकिंतुयदात्वमेदविज्ञानंजीवात्मपरमात्मनोःभवेत्तदामुक्तिश्रेष्ठःपाशछेदोभविष्यतिश्रोतात्मा

नेद्विविधंप्राहुःपरापरविभेदतः।परस्तुनिर्गुणःप्रोक्तोऽहंकारयुतोपरइत्यादिवाक्यात्तेजीवात्मपरमात्मविभागएवप्रद
र्शितः॥इदानींप्रकृत्यहंकारयोरेवतदितरत्तज्जगत्कार्यमेश्वरस्येतिब्रह्मादित्रयस्यैवव्यावहारिकेश्वरत्वलाभायप्रतिपादयिष्यन्नित
त्रादौप्रकृत्यहंकारकार्यमाह॥॥प्रकृत्यहंकारकर्त्रधीनाकार्यसिद्धिर्नेश्वराधीनाप्रमाणाभावात्॥॥कर्त्तृत्वमत्रकार्यानुकूलेषाकृतिप्र
त्ययेतपाचप्रकृत्यहंकारयोःकर्त्तृतदधीनैवकार्यसिद्धिःसृष्टिसंहारनिष्पत्तिर्भवतितादृशबलस्याहंकारकार्यत्वात्तत्रनहंकृतेपुतत्सा
मर्थ्यादर्शनात्ननुवैशेषिकाद्युक्तानहंकृतपरमेश्वराधीनाप्रनहंकृतस्रष्टृत्वनित्येश्वरेचप्रमाणाभावादित्यर्थः॥प्रकृहंबहुस्यांप्र
जायेयेतिहिप्रकृहंकारपरिवृंहकैवसृष्टिः श्रूयतेतत्राहंशब्दस्यानुकरणमात्रत्वेप्रमाणाभावइतिप्रत्नेनसत्रेणप्रकृहंकारोपाधिकेब्रह्मरुद्रयो
रेवसृष्टिसंहारकर्त्तृत्वमुक्तंननुभवतुप्रकृहंकारोत्येषांकर्त्ताप्रकृहंकारस्यानुकःकर्त्तातत्राह॥॥अदृष्टोऽपितिवत्समानत्वंव्यासर्षि
पिषुप्रकृतिप्लोमकूपाधिव्यक्तिःकालविशेषमात्रोद्भवतिनत्वेवाहंकारःकालमात्रनिमित्तादेवजायतेननुतस्यापिकर्त्तातरामती
तिसमानत्वमावयोरित्यर्थःनवसेश्वरमतेकर्मप्रियव्यक्तिरपीश्वरोलोकवत्रियतेरतिवक्तुंशक्यतेईश्वरस्यवैषम्यनैर्घृण्यापत्तेःकर्म
सापेक्षतयैवहिईश्वरस्यवैषम्यादिर्दंसेश्वरैःपरिकृत्तिर्यंतत्रेत्कर्मेश्वरएवाधितिष्ठेत्तर्हिवैषम्यादिकमापतेतेवेतिभावः॥
महतोऽन्यत॥प्रहंकारकार्यंतत्सृष्टादेर्यदन्यत्कालनीतर्यमित्यादिकंतन्महत्तादेवभवतीतिविशुद्धसत्वतयाभिमानरागाद्यभावेनप
रानुग्रहैकमात्रप्रयोजकत्वान्निरतिशयज्ञानबलैश्वर्यीत्येवार्थः॥प्रनेनसत्रेणमहत्तत्वोपाधिकंविष्णोःपालकत्वेमुक्तंमहत्त

त्तत्वोपाधिकत्वात्तुविष्णुर्महान्परमेश्वरोवृत्रेतिचश्रीयतेतदुक्तंयत्पाद्मेसृष्टेकारणं
वृत्रंतुपुरुषंसाम्यान्निर्गुणंप्रवदन्तीश्वरंनभुक्तमतंतत्रचकारणंशब्दःस्वशक्तिप्रकृत्योपाधिकोवानिमित्तकारणतो
वशेवापुरुषार्थंस्वप्रकृतिप्रवर्तकत्वादितिमंतव्यंस्वाप्यर्थंप्रकृतेःप्रकृतिःस्वतएवभवतीतिस्थलेस्थलेप्रोक्तंतत्स्वस्वामिभावो
भोग्यभोक्तृभावःसचप्रकृतिःप्रकृतेःप्राङ्मोक्षात्तत्रशंकांपरिहरति॥॥कर्मनिमित्तःप्रकृतेःस्वस्वामिभावोप्यनादिर्वीजांकुरवत्॥
येषांसांख्येकदेशिनांप्रकृतेःपुरुषस्यचस्वस्वामिभावोभोग्यभोक्तृभावःकर्मनिमित्तकःतन्मतेपिप्रवृत्तितदासनाप्रवाहस्सि
द्धनादिरेववीजांकुरवत्प्रामाणिकत्वादित्यर्थःश्रीकस्मिंश्चित्त्वेमुक्तत्वाविपुनर्भोगापत्तेरितिप्रविवेकनिमित्तकत्वमतेप्येत
दनादित्वंसमानमित्याह॥॥प्रविवेकनिमित्तोवापंचशिखः॥॥प्रविवेकनिमित्तोकस्वस्वामिभावइतिपंचशिखतुप्राह
तन्मतेप्यनादित्वमित्यर्थःएतदेकस्वमतेरागवत्त्वात्॥॥लिंगशरीरनिमित्तकइतिसनंदनाचार्यः॥॥सनंदनाचार्यस्तुलिंगश
रीरोत्पत्तिनिमित्तकःप्रकृतिपुरुषयोर्भोग्यभोक्तृभावइत्याहलिंगशरीरद्वारैवभोगादितितन्मतेप्यनादिःसइत्यर्थःलिंग
शरीरंस्वस्वामिभावयोरित्याशयःमतत्रयेपिस्वंस्वभुक्तवृत्तिवासनावत्स्वामित्वंचस्वनिष्ठवासनाहेतुवृत्तिभोक्तृत्वम
तेःप्रलयेलिंगशरीराभावेपितज्जन्योवासनारूपःस्वस्वामिभावःसंभवत्येवेतिवृत्तिवासनानांकर्मजन्यत्वंतुविवेकज
न्यमविद्याजन्यादिकंवाप्रलीतिमतत्रयेनानुपपत्तिःशास्त्रवात्पर्यमुपसंहरति॥यद्वातद्वातदुक्तिभिःपुरुषार्थः।कर्मनिमित्तोविवे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017